# ॥ शान्तिपाठ॥

ऋग्वेद : ऐतरेय उपनिषत् ।

ॐ वाङ्मे मनसि प्रतिष्ठिता ।
मनो मे वाचि प्रतिष्ठितम् ।
आविराविर्म एधि ।
वेदस्य म आणीस्थः ।
श्रुतं मे मा प्रहासीः ।
अनेनाधीतेनाहोरात्रान् संदधामि ।
ऋतं वदिष्यामि सत्यं वदिष्यामि ।
तन्मामवतु तद्वक्तारमवतु ।
अवतु मामवतु वक्तारम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

---

सामवेद : केन , छांदोग्य

ॐ आप्यायंतु ममांगानि वाक्प्राणश्चक्षुःश्रोत्रम् ।
अथो बलमिन्द्रियाणि च सर्वाणि ।
सर्वं ब्रह्मौपनिषदं माहं ब्रह्मनिराकुर्याम् ।
मा मा ब्रह्मनिराकरोदनिराकरणमस्तु ।
अनिराकरणं मेस्तु ।
तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि संतु ।
ते मयि संतु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

---

कृष्ण-यजुर्वेद : कठ

ॐ सह नाववतु ।
सह नौ भुनक्तु ।
सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु ।
मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

---

कृष्ण-यजुर्वेद : तैत्तिरीय

ॐ शं नो मित्रः शं वरुणः ।
शं नो भवत्वर्यमा ।
शं न इन्द्रो बृहस्पतिः ।
शं नो विष्णुरुरुक्रमः ।
नमो ब्रह्मणे नमस्ते वायो ।
त्वमेव प्रत्यक्षं ब्रह्मासि ।
त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि ।
ऋतं वदिष्यामि सत्यं वदिष्यामि ।
तन्मामवतु तद्वक्तारमवतु ।
अवतु मामवतु वक्तारम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

---

शुक्ल-यजुर्वेद : ईशावास्य, बृहदारण्यक

ॐ पूर्णमदः पूर्णमिदम् पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

---

अथर्व-वेद : प्रश्न , मुंडक , मांडुक्य

ॐ भद्रं कर्णेभिः श्रुणुयाम देवाः ।
भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः ।
व्यशेम देवहितं यदायुः ॥

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः ।
स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः ।
स्वस्ति नो बृहस्पतिर्दधातु ।

ॐ शान्तिः शान्तिः शान्तिः ॥

---

Please send corrections to Sunder Hattangadi (sunderh@hotmail.com)
Last updated on December 27, 1997